# Shri Datta Prarthana Taravali

# શ્રીદત્તપ્રાર્થનાતારાવલી

## Document Information

Text title : Shri Datta Prarthana Taravali

File name : dattaprArthanAtArAvalI.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીદત્તપ્રાર્થનાતારાવલી

દત્તાત્રેય મહામાય વેદગેય હતામય ।
અનસૂયાત્રિતનય મમાપાયં નિવારય ॥ ૧॥

નમો નમસ્તે જગદેકનાથ । નમો નમસ્તે સુપવિત્રગાથ ।
નમો નમસ્તે જગતામધીશ । નમો નમસ્તેઽસ્તુ પરાવરેશ ॥ ૨॥

ત્વત્તોઽખિલં જાતમિદં હિ વિશ્વમ્ । ત્વમેવ સર્વં પરિપાસિ વિશ્વમ્ ।
ત્વં શક્તિતો ધારયસીહ વિશ્વમ્ । ત્વમેવ ભો સંહરસીશ વિશ્વમ્ ॥ ૩॥

ત્વં જીવરૂપેણ હિ સર્વ વિશ્વમ્ । પ્રવિષ્ટ સચ્ચેષ્ટયસે ન વિશ્વમ્ ।
સ્વતન્ત્રમત્રાખિલલોકબન્ધો । કારુણ્યસિન્ધો પરબોધસિન્ધો ॥ ૪॥

યો બ્રહ્મરૂપેણ સૃજત્યશેષમ્ । યો વિષ્ણુરૂપેણ ચ પાત્યશેષમ્ ।
યો રુદ્રરૂપેણ ચ હન્ત્યશેષમ્ । દુર્ગાદિરૂપૈઃ શમયત્યશેષમ્ ॥ ૫॥

યો દેવતારૂપધરોઽત્તિ ભાગમ્ । યો વેદરૂપોઽપિ બિભર્તિ યાગમ્ ।
યોઽધીશરૂપેણ દદાતિ ભોગમ્ । યો મૌનિરૂપેણ તનોતિ યોગમ્ ॥ ૬॥

ગાયન્તિ યં નિત્યમશેષવેદાઃ । યજન્તિ નિત્યં મુનયોઽસ્તભેદાઃ ।
બ્રહ્માદિદેવા અપિ યં નમન્તિ । સર્વેઽપિ તે લબ્ધહિતા ભવન્તિ ॥ ૭॥

યો ધર્મસેતૂન્સુદૃઢાન્બિભર્તિ । નૈકાવતારાન્સમયે બિભર્તિ ।
હત્વા ખલાન્યોઽપિ સતો બિભર્તિ । યો ભક્તકાર્યં સ્વયમાતનોતિ ॥ ૮॥

સ ત્વં નૂનં દેવદેવર્ષિગેયો । દત્તાત્રેયો ભાવગમ્યોઽસ્યમેયઃ ।
ધ્યેયઃ સર્વૈર્યોગિભિઃ સર્વમાન્યઃ । કોઽન્યસ્ત્રાતા તારકોધીશ ધન્યઃ ॥ ૯॥

સજલજલદનીલો યોઽનસૂયાત્રિબાલો
વિનિહતનિજકાલો યોઽમલો દિવ્યલીલઃ ॥

અમલવિપુલકીર્તિઃ સચ્ચિદાનન્દમૂર્તિ-
ર્હૃતનિજભજકાર્તિઃ પાત્વસૌ દિવ્યમૂર્તિઃ ॥ ૧૦॥

ભક્તાનાં વરદઃ સતાં ચ પરદઃ પાપાત્મનાં દણ્ડદ-
સ્ત્રસ્તાનામભયપ્રદઃ કૃતધિયાં સન્ન્યાસિનાં મોક્ષદઃ ॥

રુગ્ણાનામગદઃ પરાકૃતમદઃ સ્વર્ગાર્થિનાં સ્વર્ગદઃ
સ્વચ્છન્દશ્ચ વદોવદઃ પરમુદો દધ્યાત્સ નો બન્ધદઃ ॥ ૧૧॥

નિજકૃપાકટાક્ષનિરીક્ષણાદ્ધરતિ યો નિજદુઃખમપિ ક્ષણાત્ ।
સ વરદો વરદોષહરો હરો જયતિ યો યતિયોગિગતિઃ પરા ॥ ૧૨॥

અજ્ઞઃ પ્રાજ્ઞો ભવતિ ભવતિ ન્યસ્તધીશ્ચેત્ક્ષણેન
પ્રાજ્ઞોઽપ્યજ્ઞો ભવતિ ભવતિ વ્યસ્તધીશ્ચેત્ક્ષણેન ॥

મન્ત્રોઽમન્ત્રો ભવતિ ભવતઃ સત્કૃપાવીક્ષણેન
ધન્યો માન્યસ્ત્રિજગતિ સમઃ શમ્ભુના ત્રીક્ષણેન ॥ ૧૩॥

ત્વત્તો ભીતો દેવ વાતોઽત્ર વાતિ ત્વત્તો ભીતો ભાસ્કરોઽત્રાપ્યુદેતિ ।
ત્વત્તો ભીતો વર્ષતીન્દ્રોદવાહસ્ત્વત્તો ભીતોઽગ્નિસ્તથા હવ્યવાહઃ ॥ ૧૪॥

ભીતસ્ત્વત્તો ધાવતીશાન્તકોઽત્ર
ભીતસ્ત્વત્તોઽન્યેઽપિ તિષ્ઠન્તિ કોઽત્ર ॥

મન્ત્રોઽમન્ત્રોઽન્યેઽપિ વા શાસનં તે
પાતાલે વાઽન્યત્ર વાઽતિક્રમન્તે ॥ ૧૫॥

અગ્નિમેકં તૃણં દગ્ધું ન શશાક ત્વયાર્પિતમ્ ।
વાતોઽપિ તૃણમાદાતું ન શશાક ત્વયાર્પિતમ્ ॥ ૧૬॥

વિના તવાજ્ઞા ન ચ વૃક્ષપર્ણં ચલત્યહો કોઽપિ નિમેષમેકમ્ ।
કર્તું સમર્થો ભુવને કિમર્થં કરોત્યહન્તાં મનુજોઽવશસ્તામ્ ॥ ૧૭॥

પાષાણે કૃષ્ણવર્ણે કથમપિ પરિતશ્છિદ્રહીને ન જાને
મણ્ડૂકં જીવયસ્યપ્રતિહતમહિમાચિન્ત્યસચ્છક્તિજાને ॥

કાષ્ઠાશ્માદ્યુત્થવૃક્ષાંસ્ત્ર્યુદરકુહરગાન્જારવીતાંશ્ચ ગર્ભાન્નૂનં
વિશ્વમ્ભરેશાવસિ કૃતપયસા દન્તહીનાંસ્તથાર્ભાન્ ॥ ૧૮॥

કરોતિ સર્વસ્ય ભવાનપેક્ષા કથં ભવત્તોસ્ય ભવેદુપેક્ષા ।
અથાપિ મૂઢઃ પ્રકરોતિ તુચ્છાં સેવાં તવોઝ્ઝિત્ય ચ જીવિતેચ્છામ્ ॥ ૧૯॥

દ્વેષ્યઃ પ્રિયો વા ન ચ તેઽસ્તિ કશ્ચિત્ ત્વં વર્તસે સર્વસમોઽથ દુશ્ચિત્ ।
ત્વામન્યથા ભાવયતિ સ્વદોષાન્નિર્દોષતાયાં તવ વેદઘોષઃ ॥ ૨૦॥

ગૃહ્ણાસિ નો કસ્યચિદીશ પુણ્યં ગૃહ્ણાસિ નો કસ્યચિદપ્યપુણ્યમ્ ।
ક્રિયાફલં માસ્ય ચ કર્તૃભાવં સૃજસ્યવિદ્વેત્તિ ન ચ સ્વભાવમ્ ॥ ૨૧॥

માતુઃ શિશોર્દુર્ગુણનાશનાય ન તાડને નિર્દયતા ન દોષઃ ।
તથા નિયન્તુર્ગુણદોષયોસ્તે ન દુષ્ટહત્યાઽદયતા ન દોષઃ ॥ ૨૨॥

દુર્ગાદિરૂપૈર્મહિષાસુરાદ્યાન્ રામાદિરૂપૈરપિ રાવણાદ્યાન્ ।
અનેકહિંસાદિકપાપયુક્તાન્ ક્રૂરાન્સદાચારકથાવિયુક્તાન્ ॥ ૨૩॥

સ્વપાપનાશાર્થમનેકકલ્પાન્યાસ્યન્ત એતાન્નિરયાનકલ્પાન્ ।
સ્વકીયમુક્તૌ નિજશસ્ત્રકૃત્તાન્કૃત્વા ભવાન્ધ્યા(ધા)મનયત્સુપૂતાન્ ॥ ૨૪॥

યાઽપાયયત્સ્તન્યમિષાદ્વિષં સા લેભે ગતિં માતૃચિતાં દયાલુઃ ।
ત્વત્તોપરઃ કો નિજકાર્યસક્તસ્ત્વમેવ નિત્યં હ્યભિમાનમુક્તઃ ॥ ૨૫॥

નો કાર્યં કરણં ચ તે પરગતે લિઙ્ગં કલા નાપિ તે
વિજ્ઞાતા ત્વદમેય નાન્ય ઇતિ તે તત્ત્વં પ્રસિદ્ધં શ્રુતેઃ ॥

નેશસ્તે જનિતાધિકઃ સમ ઉતાન્યઃ કશ્ચનાસ્તિ પ્રભુર્દત્તાત્રે
ય ગુરો નિજામરતરો ત્વં સત્યમેકો વિભુઃ ॥ ૨૬॥

ભોગાર્થં સૃજસીતિ કોઽપિ વદતિ ક્રીડાર્થમિત્થં પરે
તે કેચ્છાસ્તિ સમાપ્તકામ મહિમાનં નો વિદુર્હીતરે ॥

કેપીદં સદસદ્વદન્ત્વિતરથા વામાસ્તુ મેતત્કથા-
પન્થા મે શ્રુતિદર્શિતસ્તવ પદપ્રાપ્ત્યૈ સુખોઽન્યે વૃથા ॥ ૨૭॥

સોઽનન્યભક્તોઽસ્ય તુ પર્યુપાસકો નિત્યાભિયુક્તો યમુપૈત્યભેદતઃ ।
તત્પ્રીતયેઽસૌ ભવતાત્સમર્થનાતારાવલી તત્પદભક્તિભાવના ॥ ૨૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતા પ્રાર્થનાતારાવલી સમ્પૂર્ણા ।

*Shri Datta Prarthana Taravali*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*